# devI kRita shrI ve NkaTesha prAtaH stuti

# શ્રીવેઙ્કટેશ પ્રાતઃસ્તુતી દેવીકૃત

## Document Information

Text title : veNkaTesha prAtaH stuti devIkRita

File name : venkaTeshaprAtaHstutigaruDapurANa.itx

Category : suprabhAta, vishhnu, venkateshwara, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com and Avinash Sathaye

Description-comments : Garuda Purana 3,25.47-59

Latest update : August 4, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

devI kRita shrI ve NkaTesha prAtaH stuti

# શ્રીવેઙ્કટેશ પ્રાતઃસ્તુતી દેવીકૃત

સા દ્વારદેશે શ્રીનિવાસસ્ય દેવી સ્વામિપુષ્કરિણીં દદૃશે કૈશ્ચ સાર્ધમ્ ।
સ્વામિન્હરે શ્રીનિવાસેતિ સા તં બ્રહ્માદીનાં તારકં સમ્પ્રદધ્યૌ ॥ ૧॥

દેવૈઃ સાર્ધં પાલનાર્થં ચ વિષ્ણુરસ્ત્યેવ નિત્યં પુષ્કરિણ્યાં જલેષુ ।
અતઃ સ્વામિપુષ્કરિણીતિ ચાહુસ્તત્ર સ્નાનં કન્યકાન્યાશ્ચ ચક્રુઃ ॥ ૨॥

શુચિર્ભૂત્વા શ્રીનિવાસં ચ દેવાસ્તમું વિવિશુઃ શુદ્ધભક્ત્યા ખગેન્દ્ર ।
યથોપદિષ્ટં ગુરુણા તથૈવ ચક્રે કન્યાશ્ચ સર્વં ખગેન્દ્ર ॥ ૩॥

તદા હરિર્દર્શયામાસ તસ્યૈ સ્વકં રૂપં સુપ્રતીકે સુપૂર્ણમ્ ।
સા કન્યકા શ્રીનિવાસસ્ય રૂપં દદર્શ ભક્ત્યા સ્વમનોઽભિરામમ્ ॥ ૪॥

સુવર્ણચિત્રં વસનં વસાનં સોષ્ણીષકં કઞ્ચુકં સંદધાનમ્ ॥ ૫॥

મૃગોત્થમદગન્ધેન સુરભીકૃતદિઙ્મુખમ્ ।
પુણ્ડરીકવિશાલાક્ષં કંબુગ્રીવં મહાભુજમ્ ॥ ૬॥

હેમયજ્ઞોપવીતાઙ્ગં સાક્ષાત્કન્દર્પસન્નિભમ્ ।
જગન્મોહનસૌન્દર્યે કોમલાઙ્ગં મનોહરમ્ ॥ ૭॥

દૃષ્ટ્વા ચ કન્યા મુમુદે રોમાઞ્ચિતસુગાત્રકા ॥ ૮॥

તદ્દર્શનાહ્લાદપરિપ્લુતાશયા પ્રેમ્ણાથ રોમાશ્રુકુલાકુલેક્ષણા ।
નનર્ત દેવી પુરતસ્તસ્ય વિષ્ણોઃ સા ધ્વસ્તદોષા પરમાદરેણ ।
આનન્દ માં પાહિ સુખં ચ દત્ત્વા મુકુન્દ માં પાહિ વિમુક્તિદાનાત્ ॥ ૯॥

માં પાહિ નિત્યં હ્યરવિન્દનેત્ર પ્રસન્નદૃષ્ટ્યા કરુણાસુધાર્દ્ર ।
ગોવિન્દ ગોવિન્દ સુદુઃખિતાં માં જ્ઞાનાદિદાનેન હિ પાહિ નિત્યમ્ ॥ ૧૦॥

જનાર્દન ત્વં હિ સુદુષ્ટસંગાન્કામાદિરૂપાન્સતતં વર્જયિત્વા ।
હરે હરે માં સતતં પાહિ દૈત્યાન્સમાહૃત્ય પ્રબલાન્વિઘ્નરૂપાન્ ॥ ૧૧॥

રમેશ માં પાહિ ચતુર્મુખેશ વિશ્વેશ માં પાહિ સરસ્વતીશ ।

રમેશ માં પાહિ નિદાનમૂર્તે વૃન્દારવૃન્દૈર્વન્દિતપાદપદ્મ ॥ ૧૨॥

એવં તુ નત્વા પરમાદરેણ તુષ્ટાવ વિષ્ણું પરમં પુરાણમ્ ।
લક્ષ્મ્યા સદા યેઽવિદિતા ગુણાશ્ચ અસંખ્યાતાઃ સંતિ વિષ્ણૌ ચ વીશ ॥ ૧૩॥

તેષાં સકાશાદતિબાહુલ્યસંખ્યા ગુણા હરૌ તેઽવિદિતા વૈ રમાયાઃ ।
અતો હરે સ્તવને ક્વાસ્તિ શક્તિસ્તથાપિ યત્નં સ્તવને તે કરિષ્યે ॥ ૧૪॥

તવ પ્રસાદાચ્ચ રમાપ્રસાદાદ્વિધિપ્રસાદાત્ભારતીશપ્રસાદાત્ ।
રુદ્રપ્રસાદાત્સ્તવનં તે કરિષ્યે તથાપિ વિષ્ણો મયિ શાન્તિં કુરુષ્વ ॥ ૧૫॥

યદિ પ્રસન્નોઽસિ મયિ ત્વમીશ ત્વત્પાદમૂલે દેહિ ભક્તિં સદૈવ ।
ત્વદ્દર્શનાદ્દેવ શુભાશુભં ચ નષ્ટં મદીયં હ્યશુભં ચ નિત્યમ્ ॥ ૧૬॥

ત્વન્માયયા નષ્ટમિમં ચ લોકં મદેન મત્તં બધિરં ચાન્ધભૂતમ્ ।
ઐશ્વર્યયોગેન ચ યો હિ મૂકો જાતઃ સદા દીનગુર્વાદિકેષુ ॥ ૧૭॥

માં દેહિ ઐશ્વર્યમનુત્તમં ત્વત્પાદારવિન્દસ્ય વિરુદ્ધભૂતમ્ ।
ત્વં દેવ મે દેહિ સતાં ચ સંગં તવ સ્વરૂપપ્રતિપાદકાનામ્ ॥ ૧૮॥

પુત્રાદીનામૈહિકં વાસુદેવ દગ્ધ્વા ચ મે દેહિ પાદારવિન્દે ।
સદ્વૈષ્ણવે ક્રિયમાણં ચ કોપં દગ્ધ્વા ચ મે દેહિ પાદારવિન્દે ॥ ૧૯॥

દ્રવ્યાદિકે ક્રિયમાણં ચ લોભં દગ્ધ્વા વૈ મે દેહિ પાદાબ્જમૂલે ।
પુત્રાદિકે ક્રિયમાણં ચ મોહં દગ્ધ્વા ચ મે દેહિ પાદાબ્જમૂલે ॥ ૨૦॥

વિદ્યાપુત્રદ્રવ્યજાતં મદં ચ દગ્ધ્વા ચ મે દેહિ પાદાબ્જમૂલે ।
સદ્વૈષ્ણવાસહમાનસ્વરૂપં દગ્ધ્વા માત્સર્યં પાહિ માં વેઙ્કટેશ ॥ ૨૧॥

મન્ત્રં ચ મે દેહિ નિદાનમૂર્તે યેનૈવ મે સ્યાત્તવ સંગશ્ચ ભૂયઃ ।
નાન્યં વૃણે તવ પાદાબ્જસંગાત્તદેવ મે દેહિ મમ પ્રસન્નઃ ॥ ૨૨॥

ઇતીરિતઃ શ્રીનિવાસઃ પ્રસન્ન ઉવાચ દેવો હ્યમૃતસ્ત્રવં ચ ।
અત્રૈવ કન્યે પ્રજપસ્વ મન્ત્રં સુગોપ્યરૂપં પરમાદરેણ ॥ ૨૩॥

વક્ષ્યામિ મન્ત્રં પરમાદરેણ શ◌ૃણ્વદ્ય ભક્ત્યા પરમાદરેણ ।
અન્તઃસ્થમન્ત્યં હ્યાદ્યસંયુક્તમેવ સબિન્દુ તદ્વત્સ્પર્શકાદ્યેન યુક્તમ્ ॥ ૨૪॥

એકારયુક્તં પ્રથમાન્તઃસ્થયુક્તં સમત્રિકોણે ચોષ્મણા સંયુતં ચ ।
તકારસક્તં સ્પર્શમન્તઃ સ્થયુક્તમાદ્યન્ત ઓંકારસમન્વિતં ચ ॥ ૨૫॥

અનેન મન્ત્રેણ તવેપ્સિતં ચ ભવેદ્ધિ કન્યે નાત્ર વિચાર્યમસ્તિ ।
એવં સ ઉક્ત્વા શ્રીનિવાસો હરિસ્તુ પ્રતીકવદ્દર્શયામાસ રૂપમ્ ॥ ૨૬॥

નત્વા તુ સા શ્રીનિવાસં ચ દેવી ઉવાસ હ સ્વામિસરઃસમીપે ।
તસ્મિન્દિને બ્રાહ્મણાદીંશ્ચ સર્વાન્સંતર્પયામાસ ચ ષડ્રસાન્નૈઃ ॥ ૨૭॥

સાયઙ્કાલે શ્રીનિવાસસ્ય દૃષ્ટ્વા ઉત્સાહરૂપૈઃ શ્રીનિવાસપ્રતીકૈઃ ।
સાકં ભક્ત્યા સમ્પ્રણમ્યાથ દેવી પ્રદક્ષિણં શ્રીનિવાસસ્ય સુષ્ઠુ ॥ ૨૮॥

નનર્ત દેવી સુપ્રતીકસ્ય ચાગ્રે લજ્જાં ત્યક્ત્વા જય દેવેતિ ચોક્ત્વા ।
આનૃત્તકાલે ચ હરેશ્ચ વક્ત્રં દૃષ્ટ્વા ચ દૃષ્ટ્યા તુ પરં નનર્ત ॥ ૨૯॥

મમાદ્ય ગાત્રં પાવિતં શ્રીનિવાસ મમાદ્ય નેત્રં સફલં સંબભૂવ ।
મમાદ્ય પાદૌ સાર્થકૌ ચૈવ જાતૌ પ્રદક્ષિણં શ્રીનિવાસેશ કૃત્વા ॥ ૩૦॥

હસ્તૌ ચ મે સાર્થકાવદ્ય જાતૌ અગ્રે કૃત્વા હસ્તશબ્દં મુરારેઃ ।
એવં વદન્તી પ્રીણયન્તી ચ દેવં જગામ સા સ્તોત્રવચઃ કદમ્બૈઃ ॥ ૩૧॥

દેવાસ્તદા દુન્દુંભયો વિનેદિરે તન્મસ્તકે પુષ્પવૃષ્ટિં ચ ચક્રુઃ ।
તસ્મિન્કાલે ઉભયોઃ પાર્શ્વયોશ્ચ નૃત્યં ચક્રુર્દેવતાવારનાર્યઃ ॥ ૩૨॥

તથૈવ તાસ્તલશબ્દં ચ કૃત્વા તદા સર્વા નમનં ચાપિ ચક્રુઃ ।
આનન્દશૈલે સર્વદા ત્વિત્થમેવ સા સર્વદા નર્તયન્તી ચ વીન્દ્ર ॥ ૩૩॥

આનન્દમગ્ના સાપિ દેવી જગામ સ્વમાશ્રમં જૈગિષવ્યેણ સાર્ધમ્ ।
યાત્રામેવં યે ન કુર્વન્તિ વીન્દ્ર તેષાં ચ સર્વં નિષ્ફલં ચાહુરાર્યાઃ ॥ ૩૪॥

ગત્વાશ્રમં જૈગિષવ્યેણ સાર્ધં ગુરું ત્વપૃચ્છદ્વેઙ્કટેશસ્ય મન્ત્રમ્ ।
મન્ત્રસ્યાર્થં બ્રૂહિ મે જૈગિષવ્ય મન્ત્રાવૃત્તિં કુર્વતાં વૈ ફલાય ॥ ૩૫॥

જૈગીષવ્ય ઉવાચ ।
શ ૃણુષ્વ ભદ્રે વેઙ્કટેશસ્ય નામ્નસ્ત્વર્થં શ્રુત્વા હૃદયે સંનિધત્સ્વ ॥ ૩૬॥

વિતિ હ્યુત્તમવાચી સ્યાદ્યેતિ જ્ઞાનમુદાહૃતમ્ ।
કકારઃ સુખવાચી સ્યાટ્ટેતિ ચિત્તમુદાહૃતમ્ ॥ ૩૭॥

ઈશત્વમાત્મવાચિ સ્યાદેવં જ્ઞેયં તુ કન્યકે ।
પૂર્ણજ્ઞાનં સુખં વિત્તં વ્યાપ્તત્વાદ્વ્યઙ્કટાભિધઃ ॥ ૩૮॥

વ્ય (વે) મિન્દ્રિયાદિકં પ્રોક્તં વ્યઙ્ગભૂતં હરૌ યતઃ ।
કટશ્ચ સમુદાયાર્થો વ્યં (વેં) કટશ્ચેન્દ્રિયૌઘકઃ ॥ ૩૯॥

સ્વસ્મિન્પ્રેરયતે યસ્માત્તસ્માદ્વ્યઙ્કટનામકઃ ।
વિષયે પ્રેષયેન્નિત્યમતો વ્યઙ્કટનામકઃ ॥ ૪૦॥

વિશિષ્ટજ્ઞાનરૂપત્વાદ્વ્યેતિ મુક્તાઃ સદા સ્મૃતાઃ ।
મુક્તાનાં ચ સમૂહસ્તુ વ્યઙ્કટેતિ પ્રકીર્તિતઃ ॥ ૪૧॥

સદા મુક્તસમૂહાનામીશત્વાદ્વ્યઙ્કટાભિધઃ ।
લિઙ્ગદેહમતો જીવો વ્યઙ્કટેતિ સમાહૃતઃ ॥ ૪૨॥

લિઙ્ગાનાં ચૈવ સ્વામિત્વાદ્વ્યઙ્કટેશેતિ સંજ્ઞિતઃ ।
દૈત્યાનાં ચ સમૂહાસ્તુ જ્ઞાનાદિવિધુરા યતઃ ।
અતો દૈત્યસમૂહસ્તુ વ્યઙ્કટેતિ પ્રકીર્તિતઃ ॥ ૪૩॥

તેષાં સંહરણે ઈશસ્ત્વતો વ્યઙ્કટનામકઃ ।
આનન્દસ્ય વિરુદ્ધત્વાત્કામક્રોધાદયો ગુણાઃ ॥ ૪૪॥

વ્યઙ્કટા ઇતિ સમ્પ્રોક્તાસ્તેષાં નાશયિતા પ્રભુઃ ।
અતસ્તુ વ્યઙ્કટેશાખ્ય એવં જ્ઞાત્વા જપં કુરુ ॥ ૪૫॥

એવં વ્યઙ્કટમાહાત્મ્યં શ્રુત્વા દેવી ખગેશ્વર ।
નિદ્રાં ચકાર તત્રૈવ રાત્રૌ પિત્રા સહૈવ ચ ।
બ્રાહ્મે મુહૂર્તે ચોત્થાય હૃદિ સસ્માર કન્યકા ॥ ૪૬॥

(વ્યઙ્કટેશસ્ય પ્રાતઃ સ્તુતિઃ) ।
શ્રીવ્યઙ્કટેશશ્ચ નૃસિંહમૂર્તિઃ શ્રીવરદરાજશ્ચ વરાહમૂર્તિઃ ।
શ્રીરઙ્ગશાયી ચ અનન્તશાયી કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૪૭॥

શ્રીકૃષ્ણમૂર્તિશ્ચ ગદાધરશ્ચ શ્રીવિષ્ણુપાદસ્તુ પ્રયાગવાસઃ ।
નારાયણઃ શ્રીબદરીનિવાસઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૪૮॥

દામોદરો વૈ ત્રિજગન્નિવાસઃ શ્રીપાણ્ડુરઙ્ગશ્ચ નૃસિંહદેવઃ ।
શ્રીરામદેવશ્ચ અમોઘવાસઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૪૯॥

શ્રીધર્મપુત્રશ્ચ નૃસિંહમૂર્તિઃ શ્રીપિપ્પલસ્થશ્ચ મુહલ્લવાસઃ ।
કોલાનૃસિંહઃ શૂર્પકારસ્થ સિંહઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૦॥

ચતુર્મુખશ્ચારુસરસ્વતી ચ સ્વભારતી શર્વસુપર્ણશેષાઃ ।
ઉમામહેન્દ્રશ્ચ શચીમુખાસ્તાઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૧॥

દ્વારાવતી કાશિકાવન્તિકા ચ પ્રયાગકાઞ્ચ્યૌ મથુરાપુરી ચ ।
માયાવતી હસ્તિમતી પુરી ચ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૨॥

ભાગીરથી ચૈવ સરસ્વતી ચ ગોદાવરી સિન્ધુકૃષ્ણે ચ વેણી ।
કલિન્દકન્યા યમુના ચ નર્મદા કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૩॥

વિતસ્તિકાવેરિસતુઙ્ગભદ્રાઃ સુવઞ્જરા ભીમરથી વિપાશા ।
સુતામ્રપર્ણી ચ પિનાકિની ચ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૪॥

સ્વામિપુષ્કરિણી ચૈવ સુવર્ણમુખરી તથા ।
શ્રીપાણ્ડવી તૌંબરુશ્ચ કપિલા પાપનાશની ॥ ૫૫॥

ગુરુર્વસિષ્ઠઃ ક્રતુરઙ્ગિરાશ્ચ મનુઃ પુલસ્ત્યઃ પુલહશ્ચ ગૌતમઃ ।
રૈભ્યો મરીચિશ્ચ્યવનશ્ચ દક્ષઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૬॥

સપ્તાર્ણવાઃ સપ્ત કુલાચલાશ્ચ દ્વીપાશ્ચ સપ્તોપવનાનિ સપ્ત ।
ભૂરાદિકાનિ ભુવનાનિ સપ્ત કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૫૭॥

માન્ધાતા નહુષોઽમ્બરીષસગરૌ રાજા નલો ધર્મરાટ્-
પ્રહ્લાદઃ ક્રતુરાડ્વિભીષણગયૌ વ્યાસો હનૂમાનપિ ।
અશ્વત્થામ કૃપાવુમા દ્રુપદજા શ્રીજાનકી તારકા
મન્દોદર્યખિલાઃ પ્રભાતસુમહં કુર્વન્તુ નિત્યં હરે ॥ ૫૮॥

અશ્વત્થસ્ય વનાનિ કિં ચ તુલસીધાત્રીવનાનિ પ્રભો
પુન્નાગસ્ય વનાનિ ચંપકવનાન્યન્યાનિ પુષ્પાણિ ચ ।
મન્દારસ્ય વનાનિ યાનિ ચ હરેઃ સૌગન્ધિકાન્યપ્યહો
નિત્યં તાનિ દિશન્તુ મત્પ્રમુદિતં શ્રીવેઙ્કટેશ પ્રભો ॥ ૫૯॥

એવં સ્મૃત્વા શ્રીનિવાસસ્ય દેવી કૃત્વા શૌચં જૈગિષવ્યેણ સાકમ્ ।
સ્નાતું યયૌ પુષ્કરિણીં હરેશ્ચ સ્નાનં સમ્યક્તત્ર ચકાર દેશે ।
સમ્યગ્જપ્ત્વા વ્યઙ્કટેશસ્ય મન્ત્રમુવાચ સા જૈગિષવ્યં ગુરું ચ ॥ ૬૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
દેવી કૃતવેઙ્કટેશદર્શનતત્સ્તુત્યાદિવર્ણનં નામ પઞ્ચવિંશોધ્યાયઃ ॥

Garuda Purana 3,25.1-60

Proofread by YV Malleswara Rao malleswararaoy at yahoo.com

and Avinash Sathye

*devI kRita shrI ve NkaTesha prAtaH stuti*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*